National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 28-29
© 2019 NJHSR
www.sanskritarticle.com

**Dr. Debasis Tripathy**
Assistant Professor,
Deptt. Of Sahitya,
S.J.S.V. Shrivihar, PURI ,
Odisha-752003

**Correspondence:**
**Dr. Debasis Tripathy**
Assistant Professor,
Deptt. Of Sahitya,
**S.J.S.V. Shrivihar, PURI ,**
Odisha-752003

# भाषापरम्परासु संस्कृतम् – एकमध्ययनम्

**Dr. Debasis Tripathy**

भारतवर्षमतीवपवित्रतमं क्षेत्रम्। पूण्यभूमिरियं सर्वदा ज्ञानेन परिपूर्णा। अत्र भारतवर्षे विविधतासु वैचित्र्यं परिलक्ष्यते। अयं देशः पृथिव्यां सर्वश्रेष्ठः। मानवसमाजस्य आत्यन्तिककल्याणाय महर्षयः तपसा तेजसा ज्ञानमनुभूय सांख्ययोगन्यायवेदान्तव्याकरणादीनि शास्त्राणि विरचयामासुः। तदानीं ज्ञानविज्ञानक्षेत्रे भारतवर्षं सर्वापेक्षया अधिकमासीत्। इदानीं पठनपाठनपरम्परायां परिवर्तनमागतम्। वैदिकरीत्या अध्ययनाध्यापन नैव प्रचलति। साम्प्रतमाधुनिकशैल्या शिक्षणं भवति खलु। अतः वैदिकपरम्परायां वयमनभिज्ञाः। पुरा ब्राह्मणाः वेदमधीन्य विद्वांसः वभूवुः। तदानींमेतादृशी गुरुकुलपरम्परा आसीत् यत्र वेदं वेदाङ्गञ्च पाठ्यामासुः। अतः उक्तं महाभाष्ये “**ब्राह्मणेन निष्कारणो षडङ्गो वेदोध्येयोज्ञेयश्चेति**”।

वस्तुतः इदानीं प्राचीनपठनपाठनपरम्परा नैव परिलक्ष्यते। परन्तु संस्कृतभाषायाः महत्वात् वेदवेदाङ्गवेदान्तादीनिशास्त्राणि अद्यापि अपरिवर्तितानि विद्यन्ते। रामायणमहाभारतादिषु काव्येषु अष्टादशपुराणेष्वपि भाषादृष्टया किमपि परिवर्तनं नैव जातम्। किञ्च कालिदासभवभूतिभारविमाघादिभिः रचितेषु काव्येष्वपि भाषादृष्टया नास्ति किमपि परिवर्तनम्। इदानीमपि विद्वद्भिरचितेषु कवितासु किमपि परिवर्तनं न जायते।

संस्कृतभाषायाः व्याकरणमतीवमहत्वपूर्णम्। इदंमतिशयवैज्ञानिकशैल्यासंगठितम्। अस्यां भाषायां कदापि परिवर्तनं च प्राप्नुयामः। उपनिषन्सु आत्मज्ञानमुपलभ्यते। सर्वोपनिषदां सारवात्ती श्रीमद्भगवद्गीता। अत एव उक्तम् –

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधी र्भोक्ता दुग्धं गीतामृतं महत्॥**

भारतवर्षस्य सर्वे जनाः संस्कृतभाषया सम्पृक्ताः सन्ति। अस्माकं संस्कृतिः रामायणपुराणादिषु एव विद्यमाना। तत्तच्छास्त्रेषु याद्धशाः विचाराचारनियमाः विद्यन्ते। तत्तद्विचाराचारनियमानेवावलम्ब्य अस्माकं भारतीयसंस्कृतिरद्य पृथिव्यां मूर्द्धन्यतमं स्थानं लभते। यद्यप्यधुना वैज्ञानिकयुगे अस्माकं जीवनचर्चायां परिवर्तनं द्रश्यते। प्राचीनसंस्कृतिरद्य अपेक्षितेव विद्यते। वयं वस्तुवादिनः सुँखसाधनातिशय्यं भोगप्राचुर्यं सम्प्राप्य अहरह कर्मतत्पराः भवामः।

तात्कालिकं क्षणिकं वा सुखंमुपलभ्य वयमात्मानं धन्यं मन्यामहे। दूरभाषादिविविधाद्भुतवस्तुनि वयं व्यवहृत्य इदानीमत्युन्नत्तमानवसभ्यता इति विचारयामः। परन्तु पुनः सर्वे विभ्यति। मानवसभ्यता नश्यति विश्वं विनश्यति च प्रदुषणेन। एतन् सत्यमस्माकमाचार्याः दार्शनिकाः कवयः मनुष्याणा मात्यन्तिकं कल्याणं वास्तविक सुखं शान्ति र्वा कुत्र केनोपायेन वा प्राप्स्याम एतन्सर्वमादौ उपनिषदादिषूपदिदिशुः। गीताभागवतरामायणमहाभारतादिग्रन्थेष्वपि पूर्वमेवोपदिष्टम्।

वस्तुतः अस्मिन् मनुष्यलोके पृथिव्यांमात्यन्तिकं सुख नास्त्यैव। यत् वस्तु येनोपादानेन निर्मितं तत्तस्य नैव दृश्यते। संस्कृतभाषायाः व्याकरणं सर्वोत्कृष्टम्।

भारतवर्षस्य सर्वासामपि भाषाणां जननी संस्कृतभाषा। पाणिनीयव्याकरणस्य अष्टाध्याय्याः रचनाशैलीं विलोक्य सर्वे विस्मिताः भवन्ति। मुख्यतः चतुर्दशमाहेश्वर-सूत्राण्याश्रित्य महर्षिपाणिनिरचनामसहस्त्र विरचिता। अष्टाध्यायां सन्धि – समास – कारकलिङ्ग कृदन्ततद्धितादिसर्वविधविषयाः विराजन्ते। श्रीमता भट्टोजिदीक्षितेन विरचितायां सिद्धान्तकौमुद्यामेते विषयाः स्पष्टमस्माभिः पठ्यन्ते दृश्यन्ते च।

वस्तुतः वयं भारतीयाः आकुमारी हिमालय यावत् सर्वत्र संस्कृतभाषाया विरचितानि पुस्तकानि अद्यापि उपलभ्यन्ते। अतः अस्माकं भारतीयसंस्कृतिः एका एव। भारतीयसमाजः भारतीय संस्कृतिमवलम्ब्य संगठिता। पूण्यभूमिभारतवर्षस्य महती संस्कृतिः संस्कृतभाषायामेव निहिता अस्ति। यद्यपि अधुना विविधभाषाया अनुवादः क्रियते। विविधभाषाया अनुवादः पुस्तकान्यपि प्राप्यन्ते च। अस्माकं संस्कृतिः संस्कृते एव सन्निहिता अस्ति। संस्कृतं वयं विलोक्यं संस्कृतीं विजानीमः। रामायणं महाभारतंमधीय धर्ममधर्मञ्च जानीमः। वेदमधीन्य कर्त्तव्यं किमिति वोद्धुं पारयामः। पुराणानि पठित्वा परमार्थं प्राप्नुयामः। दर्शनानि नाम सांख्ययोगन्यायवेदान्तादिकं विदित्वा विद्वांसः भवामः। विद्या स्वरूपं भवति। अयं संसारः सुखोपादानेन नैव निर्मितः। अस्य स्वरूपमेव दुःखमयम्।

अतः पाञ्चभौतिकशरीरमपि दुःखमयमेव। अतएव उक्तं भगवता : -

**किं पुनः ब्राह्मणाः पुण्याः भक्ता राजर्षयस्तथा।**
**अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥**

सुखं तर्हिः कुत्र इति चेत्तुच्यते भगवता एव –

**ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।**
**शाश्वतस्य च धर्मस्य सुखमैकान्तिकस्य च॥**

अस्यैवआत्यन्तिकस्य च सुखस्य प्राप्तिरपि महर्षिवेदव्यासेन श्रीमद्भागवतं वर्णितम् तथा हि –

**धर्मः प्रोज्झित - कैतवोऽत्र परमो निर्मन्सराणां सतां**
**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।**
**श्रीमद्भागवते महामुनि कृते किं वा परैरिश्वरः**
**सद्यो हृद्यवरुध्यतेत्र कृतिभि शुश्रूषुभिस्तत्क्षणात्॥**

भारतवर्षस्य हिन्दीओडिआतेलुगुवङ्गलादिप्रान्तीयभाषासु सर्वान्नपि प्रचलिताः शब्दाः संस्कृतसाहित्यशब्दकोषे एव विद्यन्ते, ते च शब्दाः काव्यपुराणोपनिषद्दर्शनादिशास्त्रेषु व्यवहृताः सन्ति। अस्माकं भारतीयसमाजः संस्कृतसमाजः। संस्कृतं नाम संस्कारयुक्तं साधुरुपम्। अस्माकं देशः वस्तुतः एकः एव भाषापि एकैव संस्कृतिरपि एकेव।

**आभिमुख्यम् : -**

मानवसमाजस्य संस्कृतं प्रति निष्ठा भवितेति प्रकल्पस्य मूलमाभिमुखयम्। संस्कृते निष्ठायां सति स्वदेशेऽपि भक्तिर्भविष्यति। देशवासिनः सदा सुखं शान्तिं समृद्धिं च प्राप्स्यन्तिः। भारतवर्षस्य गौरवं पुनरागमिष्यति। आधुनिकविज्ञानेन साकमस्याः भाषायाः अपि सुरक्षा भविष्यति। अस्माकं संस्कृतं विज्ञानसम्मतम्। अस्यां भाषायां विद्यमाना: सर्वेऽपि ग्रन्थाः प्रामाणिकाः। श्रीमद्भगवद्गीता, श्रीमद्भागवतं, रामायणं महाभारतञ्च अस्माकं देशस्य संस्कृतेः स्वरूपाणि। अतः संस्कृतस्य प्रभावः समाजे संस्कृतौं च कीद्वश: इति द्रष्टयः।

**उद्देश्यम् –** भारतवर्षस्य संस्कृतिः संस्कृते एव परिपूर्णा। परन्तु वयं संस्कृतमनावश्यकमिति चिन्तयित्वा संस्कृतिमपि विस्मरामः। संस्कृते सुरक्षिते संस्कृतिः संरक्षिता स्यात्। संस्कृतौ च संरक्षितायामास्माकं देशस्य रक्षा। सम्पूर्णं भारतवर्षं संस्कृतमवलम्ब्य स्वकीयं महत्वं विदधाति। भारतवर्षे प्रतिराज्यं संस्कृतस्य प्रभावः दृश्यते। संस्कृतस्य प्रचारप्रसारपठनपाठनैः देशस्य ऐक्यं स्थस्यति। ऐकयस्थापनाद्देशे सर्वत्र शान्तिरपि स्थास्यति, इदानीमस्य संस्कृतस्य प्रभावः समाजे कुत्र कुत्र दृश्यते, स च प्रभावः किद्दशः द्रष्टव्यः।

**समाजे प्रभावः –**

**पूज्यपूजाभावः –** अस्माकं भारतवर्षे आचार्यदेवो भव। मातृदेवो भव पितृदेवो भव। अतिथिदेवो भव इति विचारः अधुनापि प्रतिगृहं परिपाल्यते।

**सदाचारः –** अस्माकं धर्मशास्त्रे सदाचारज्ञानं शौचाशौचप्रकरणं सविस्तरं दृश्यते। सदाचारप्रभावेण मनुष्याणां मनो निर्मलं भवति। मनसो प्रसन्नेन प्रशान्तिंमधिगच्छति मनुष्यः।

**संस्कृतौ प्रभावः –** अस्माकं संस्कृतौ संस्कृतस्य परिपूर्णः प्रभावः परिलक्ष्यते अद्यापि। अस्माकं परिवारे होमादिकं भवति तदानीं वैदिकमन्त्राः उच्चार्यन्ते। ब्राह्मणाः एव तत्र याज्ञिकाः स्युरिति प्रभाव अस्ति।

**श्रुतिस्मृतिपुराणानां प्रभावः –**

अस्माकं देशे चतुर्षु धामसु श्रुतिस्मृतिपुराणानि पूज्यन्ते। चतुर्षु दिक्षु वद्रीनाथ-जगन्नाथ-द्वारिकानाथ-रामनाथधामसु संस्कृतिरभिन्ना। अत स्तत्संस्कृतिषु समाजेषु च कीद्दशः प्रभावः इति प्रकल्पेनानेन द्रष्टव्यः इति दिक्।